This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६९

सुधाविनोदकाव्यसटीकमिदं

Accession No: 160 M878
Title :- सुधा विनोद काव्यम् सटीक
Author :- पुरुषोत्तमसुत
Subject :- poetry
पत्रे - 12

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ श्रीगणेशायनमः॥ कुवेशायदलाकारशयशायिनिमौक्तिके॥ मुहुर्मुराद्दासीनामासीनामाश्रये श्रियं॥१॥ राधाविनोदकाव्यस्यप्रकाशः परितन्यते॥ सुधियारामचंद्रेणमास्यतेवसरोरुहा॥२ त्रारीप्सितस्यनिर्व्यूढ्यपरिसमाप्तिकामनयाकृतस्येष्टदेवताकीर्तनात्मकंमंगलंशिष्यशीक्षा येनिबध्नन्काव्यलक्षणीकृतामाशिषंप्रतिजानीते॥ अशोर्नमस्क्रियेतिस्मरणात्॥ ननुसर्गबं धोमहाकाव्यमित्याद्यधिकृत्याशीर्नमस्क्रियेत्याद्युक्तमितिकथमस्याःकाव्यलक्षणमितिचेन्न॥ ए तदेवाधिकृत्यन्यूनमधत्रयेःकश्चिद्गैःकाव्यंनदृष्यतीत्यंकैः किंचसर्गबंधोमहाकाव्यमित्य नेनसर्गमंतरेणाकृतस्यकाव्यत्वमलक्षणत्वमेव॥ विशेषंविनाकृतस्यसामान्यत्वात्॥ वस्तुतः काव्यमन्यद्देवतायत्ररसादिचित्तेनिविस्थतमन्यच्च॥ मालिनेति॥ वनेमालीनः अस्मान् अवं राम त्वीत्यन्वयः किंविधः॥ घनमालोमेघश्यामइत्यर्थः॥ तथाबलेनरामेणमालतइतिसः॥ यद्वा॥ १ स्वसामर्थ्यवान्॥ ननुशक्तिंविनाहृतस्यनाकृतस्यनास्यरक्षणक्षमत्वइत्यतआह॥ मालिनेति॥ य द्वान्यस्काव्यस्यश्रृंगारित्वान्नादरार्हचरितःकीर्तनीयइत्यतआह॥ मालिनइति॥ मायाश्रियालीं न नोंतन्मयइत्यर्थः॥ मःशिवेरमायांचेतिविश्वः॥ पुनःमायांमायायांआलीनः निरंजननिराकारत्वा

दसक्तःमायांलक्ष्म्यांमलीनः सालुलीनासलुनोसक्तःरकादासीनत्वात् मालक्ष्मीःमालक्ष्म यंचमायांचेतिविश्वः॥ तथामालिनः मालापुष्पस्रक्सोयस्यास्तीतिमालीसुदामातस्यईनः स्वा मीहरिर्भंजनत्वात्॥ यद्वामालिनेवअलीनतद्भिन्नइत्यर्थः एतेनानुयोर्मेरइत्यर्थतिप्रत्यक्ष मरावब्रह्मेवालिर्भृंगस्तस्यईनःप्रभुरक्षणेभृंगत्वंकमलानुषंगित्वात्॥ नलंगीत्यसलिमु खरत्वाद्वोपचर्यते॥ तथाचनाभिकमलेनीलीनचतुरानन इत्यर्थःमृच्चंद्रेविधोरिवेत्येकाक्षी रः॥ मांशोभांअलंतिव्रजंतियतेयदुगोपादयस्तेषाईनःस्वामीइनःसूर्यप्रभोरश्मिमंगोक्षत्रिय स्वेचेतिविश्वः यद्वामालंतेतेमालिनःदेवाः सत्पुरुषावातेषाईनः प्रभुःईनःस्वामिनिसूर्येचेत्यमरः॥त थामापुष्पदामचान्॥ मालापुष्पादिदामनीतिविश्वः अतएवमालीशोभमानइत्यर्थः॥ अथवादरा द्यवतारधरंहरिंप्रत्येककीर्तयति॥ मालिनइति॥ वनेजलेमालतइतिसमासः॥ किंविधःघ घनं नमालीनिबिडमालंलइतिसः॥ तथाबलमालीसखासन्बलनकरोबलेनभासमानः॥ न अन्यत्समंसर्वत्रैवंवनमालीकूर्मरूपीहरिर्नोव्यात् सकलक्रमउलभरक्षरणनिष्यंदफला

कीदृक्॥घनमाली घनसदृशः तद्वच्छ्यामोवेत्यर्थः॥तथाबलमालीसागरनिमग्नमहीमंडलोद्धा
न रणकरणेबलेनमालतइति॥मालीनोवनमालीलक्ष्मीनृसिंहोनःपायात्॥कीदृक्बलमा
न ली॥हिरण्यकशिपुसन्मूलनकरणेबलेनमालतइति॥एवंअघनमाली अघनंक्रूरंमालत
इतिसवामनोनःपायात् अघनोहरोमालीशोभमानइति॥कीदृक्बलमालीबलच्छलना
बलेन नुकूलेनमालतइति॥एवंबलमालीसकलक्षेत्रोन्मूलनेनकरणेनबलेमालतेसरामचंद्रो न
नःपायात्॥तथावनमालीवनेविचरणमानःएवंबलेनकालिंदिकर्षणाकरणेनबलेनमा
लतेसबलकृष्णोनःपायात्॥तथाजवनमालीसर्वप्राणहिंसयामालतेसबुद्धोनःरक्षतु॥एवं
म्लेछोन्मूलनकरणेनबलेनमालतेसकल्किर्नोबलु॥एवंदशावतारधरोहरिर्नःपातु॥ज
डुकं॥वनजोवनजोरवरस्त्रीरामीसकपोरूपः॥अवतादशावतेतकृष्णंतुभगवान्स्वयं॥९॥
न संमोहकामंत्रोद्धारयक्षेतु॥संमोहनकर्ममंत्रमयस्वरूपोवनमालीनोबलु॥मंत्रमयत्वंर २
वितिज्ञानेहि॥किंविधः॥मालीमाशक्तिसामान्येनस्वरासेतुअलीनाःकरादयःतद्वत्तत्वे
वो नैश्चारसहत्वेनप्रथमातिक्रमेकारणाभावादितिन्यायेनककारएव।तथाचतत्स्वरूपः

नथा

घनमालीइंद्रस्यनलकारात्मकःमालिनःमायांइकारलीनःतथामालिनःमेघंद्रेविलीनःम
श्चइअलिनोवद्वर्णोहिरम्यादिवत्साधुरितिसर्वत्रायमेवसमानइतिकेचित्एवंचकामबी
जमुद्धृतंभवतीति॥तदुक्तं॥अस्माकंम्यासमासीनःप्रतिबिंबुविकल्पितः॥बीजंमनोमयःप्रोक्तं
जगच्चित्रयमोहनमितिलक्षणात्॥ननुमालिनइत्यत्रमश्चस्यभिन्नार्थत्वेपि अलिनपदं
समासार्थमेवअथमश्चस्यतथात्वेपिमालिनइत्यस्मिन्नार्थत्वमेवइतिचेन्न॥अनुप्रासार्थमपि
सतिअनुप्रवेविशेषाविन्निवेशनियतव्यंजनसमुदायस्यथमकव्यवहारिजनकत्वादितिउच्य
लंका ते॥नहियमेकारात्रिलक्षणः किंतुप्रासालंकारःवर्णसाम्यनुप्रासत्वात्मदलिखवाच्यंहन्नमि
तिदिक्॥३॥ ॥मालिनोघनमालीमालिनोबलमालीमालिनोघनमालीमालिनोबलु
मालीं॥३॥ ॥विधुसुहृद्धिरदानलपीडिता विधुसुहृत्तरलानिलपीडिता॥विधुसुहृद्वि
दनालिमपीडिताविधुसुहृत्सुगिरोकिरदीडिता॥२॥ ॥विधुसुहृदिति॥विधुसुहृत्विधुहृ
रिःसुहृत्प्रियोयस्यासाराधाअलिंसखींप्रतिहडीताःसुताःईडःस्तुतोसकगिरोवचःकिरत्युवाच॥
किंविधाविधुसुहृदविरठानलपीडिताविधुरेवहरिरेवसुहृत्प्रियस्तस्यविरहानलेनपी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

डिता विधुर्विष्णोश्चंद्रमसीत्यमरः तथा विधुसुहृत्तरला॥ विधोश्चंद्रस्यसुहृदाकामेनतेरलोत
थाअनिलनपीडितावसंतानिलपीडितेसर्थः॥ विधोश्चंद्रमसःकर्पूरस्यसुहृत्समीतरलोतार
मणीयस्यासा॥ विधुःशशांकेकर्पूरइतिविश्वः॥ तरलश्चचलेपीद्वेतारमध्यमणावपितिं
विश्वः॥ तथाविधुसुहृदनासुधांशुंसुरवीसदासुकलंकिनांचंद्रेणविरलदृश्यायोमेयास्याःचंद्र
नसाम्यमितिभावः॥ यद्वाकर्पूरस्यमवदनेत्यर्थः॥ तथाईडितास्तुताजनेतिनिशोबः॥ ननुचपिशब्दस्य
व्यर्थत्वात्॥ व्यर्थत्वदोषोऽतिचेन्नयमकभंगाभिप्रायेणेत्यात्॥ तदुक्तं॥ नव्यर्थयमकाश्रिति॥ न
थाचमाघे॥ बभौसुरेवनाप्रतिमेनकांचनेनश्रियाधिकांतांप्रतिमेनेकांचनेति॥ यद्वाअनिलपीडि
तेत्यनेनापिशब्देनबोध्यः॥ अपितेत्यस्यापिसाधुत्वात्॥ नव्यर्थत्वमित्यपरे॥ एनंविष्णुनापीडि
तारबंउनादिनेत्याशयः॥ अकिरदितिलक्ष्यात्यातनद्युतविलंबितरला॥ अत्रहिविप्रलब्धानापि
कालक्षपणं॥ संकेतस्थलेप्रियानवलोकनेसतिव्याकुलचित्ताविप्रलब्धा॥ इयंचमुग्धामध्यःप्रौ
ढाभेदात्त्रिधा॥ अत्रप्रौढेयंलक्षणेयंमत्पित्रकीयापरकीयासाधारण्यवनितेचेत्रिधा॥ इयंपर
कीयेव॥ तल्लक्षणं॥ अत्रकटपरपुरुषानुरागापरकीया॥ सापिपरोढाकन्यकाभेदात्द्विधा॥ इयं

चपरोढेवरसम्भ्रंगारःसचसंभोगविप्रलंभभेदाद्विविधः॥ इहविप्रलंभएव॥ सचतुर्द्धापूर्वानु
रागमानप्रवासकरुणात्मकत्वात्॥ अत्रपूर्वानुरागएव॥ लक्षणंच॥ स्त्रीपुंसोर्नचक्षुरादितानु
रागत्वेसतिअलाभःपूर्वानुरागः॥ इदंचबहुविस्तृतमन्यत्रेतिसंक्षेपः॥ २॥ किमुनाचेत्याह
॥ उदयतेदयतेदयतेशशी सखिकरैरकरैस्तिमिराकरैः॥ दिशमिमांचरमांचरमारमकमल
कोमललोललोचनं॥ ३॥ ॥ उदयतइतिहेसखीशशीचंद्रःउदयतेकरैःकिरणैरिमांप्राचीं कृत्वा
दिशमुदयतइत्यन्वयः॥ किंविधैःकरैःतिमिराकरैःतिमिरंअसमंतात्करोतिहिंसतिनाशयतीतत्
ध्वांतनाशकैरित्यर्थः॥ अत्रहिंसायांआदिपचाद्यच्॥ तथासमुच्छ्वसत्किरणैरनुमेयोदयस्य
र्थः॥ चपरंकरैरुत्वामादयतेहिनस्तिदयदानगतिरक्षणहिंसादानेषु॥ भैरवादिरुः॥ पीडनत्व
माह॥ किंविधैकरैः॥ अकरैः॥ अकंदुःखंराततिददतिमयतेअकराःहेः अकंपापेचदुःखेचेतिवि
श्वः॥ यद्वाकजलंरातितेकराःशीतलाःतादृशानेनेउदमेरित्यर्थः॥ कंशिरोजलमारभ्यातमित्य
क्षरः॥ अतस्त्वरामारमरमारमयतीतिरमारमइतिपचाद्यच्॥ तंरमारमंसतुरमासकोस्ति
अतःनागमिष्यतिचरगच्छ॥ चरगतिभक्षणयोः॥ किंविधं॥ कमलकोमललोललोचनं॥ कम॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लयन्मृगबलकोमलेलोलत्वंचपलत्वंलातःस्वीकुरुतस्तेलोलेलोचनेयस्यतं।मृगभेदेतुक
मलइतिमेदिनीकरः।कमलदलकमनीयलोचलनयनमित्यर्थः॥तथाचतिमिरघटाविघटक
रनिकरेहिमकरेउदितेहरिणलुप्तमयइतिभावः॥यद्वाहिमसखी।दूत्वंमार।रमारालितलहरि
चर।यतःअकमलकः।अंकुरणयमलोयस्मिन्निलिनताहकूकेशिरोयस्मतादृशःशशीउद॰
येतमोचदयते।तथाचमलिनस्यास्यमाप्रतिनिर्दयत्वप्रयोजकत्वेनप्रयुक्तइतिलुनेतिभा
वः॥यद्वाकीदृशःशशी।कमलकः।केसुखमलएवमलकःमस्यमसुखदइत्यर्थः॥मलोरुखी
यापविट्कीटकृष्णेत्यभिधेयवदितिमेदिनीकरःयद्वामारमचरएषःशशीउदयतेमभे
चरमादिशमवरुध्यतिदयतेदर्शयतीत्यर्थः॥३७॥कुमुदबंधुरबंधुरबंधुरःसतनु
तेतनुतेसनुतेततः॥हिमकरोहिमतांहिमतांनतोकिमनुमोसदृशामदृशाविधोः॥४॥
संप्रतिचंद्रंनिंदति॥कुमुदबंधुरबंधुरिति॥हेसखीहियस्मात्मेमानुहिमकरश्चंद्रोऽहिम
तांउष्णतांनतनुते॥तत्किंविधोःसदृशांपरपरागतंकिं॥ननुत्वमेनंनिंदयसिजतस्तामनुता
पयतित्यतआह॥किंविधानतोनम्रीभूतामित्यर्थः॥पुनःकिंविधामतोमान्यां॥ननुज्ञानवि

कुलपरपरागतविरहिनीपीडनमनुचितंकिं

धुरेवत्वमेनमभिसंधत्सेइत्यतआह॥किंविधं॥सदृशांवाहशांज्ञानयुक्तादृक्कांतेज्ञातरि
त्रिपुरइत्यमरः॥ननन्वयमहिमएवेत्याह॥पुनःकीदृशःशशी।अबंधुरः।अपांबंधुःकूपःतरति
त्रायतेत्यबंधुरःशीतलः॥पुसेवाबंधुःप्रहिःकूपइत्यमरः॥कुमुदबंधुरबंधुः कुमुदा
नांकैरवाणांबंधुरारम्यो।बंधुमित्रबंधुरबंधुरोरम्यइतिविश्वः।कुमुदंकैरवेरम्येरक्तपद्मे
इतिमेदिनीकरः॥ननुअयंतुछोभविष्यतीत्यतआह।अतनुतेतनुतेततः।अतनुता
महत्वइतःस्ततस्तत्वादृशस्यासौतादृशश्चेतिसार्वविभक्तिस्तसिच्च॥तथाचाति
मान्यइत्यर्थः॥विधोःसदृशमित्यनेनदमइत्राभिव्यज्यतेतद्वदीयास्यदृशस्तादृशी
मात्रतिविप्रलब्धत्वेसुचितमेव॥तेवान्यनिरूपितव्यग्यप्रहर्षोद्धारत्वाच्चुतभत्व॥यद्वासंवा
दिनिचारकत्वात्हिमकरायम्यसःअंहरिमानुविप्रलभादहिमतांतनुते।तद्वि
धोःसदृशंचंद्रस्यवास्यसंतापजनकत्वमित्यर्थः॥किंविधादरिः को भवि मुत्प्रमोदायधो
मानुषाणांनानेषांबंधवोराक्षसाःरौतिरात्रिंगृह्णातिसकुमुदबंधुरः बंधुवाणां

स्पर्श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रम्याणां बधुर्मित्रं ततो विग्रोषणसमासः॥४॥ पुनःप्रकारांतरेण चंद्रं निंदति॥ ॥कमलिनीमलिनालिनाविचलतावचलतासुलताभ्रुभा॥विधुतभाविधुताविधुभाभुभिर्न
नयोरनयोरयसीनयो॥५॥ ॥कमलीनमिति॥हेअलि॥कमलिनीपक्षीनां अनयो
रीनयोर्विशालयोर्नयनयोः॥नयसीनपश्यसीतिकाकुः॥मलीमालिन्यंयस्यास्तीतिमल्ली
तेनमलिनामलीमसेनेअलिनाविधुतात्यक्ताकुत्सीतेनाभ्रमरेणविहीनांकिमन्येः
पक्षिभिरित्यर्थः॥त्यक्तहीनंविधुतंसमुत्सिक्तधूतमुत्सृष्टमित्यमरः॥ननुचयमनभिज्ञ
एवेत्यतआह॥किंविधनलतासुभालत्यादिषुविचलनाभ्रमणेनेत्यर्थः॥नन्वि
यंलुब्धाभविष्यतीत्यतआह॥लतासुभालनासूत्प्रेक्षणीयामित्यर्थः॥ननुकुतो
हेतुगर्भविशेषणमाह॥किंविधाविधिमानुभिश्चंद्रकिरणैर्विधुतभालिरस्यास्तां
तिमित्यर्थः॥विधानेकहसंसारचक्रजुष्टप्रेषास्वकरस्पर्शमानेनातिमलिनत्वंलक्षिना
मत्सकाशात्रास्यैवमालिन्यहेतुरन्यथाकथंभवेदितिभावः॥परकरस्पर्शमृष्टां

तिंप्रोषितभर्तृकांमलिनोपिविजहात्येवलज्जचिलमित्यंगं॥लतासुगोपांगनासुविचलैरभ्रमाणेनालिनाहरिणासर्वगोपांगनारम्याकमलिनीमात्मकानपश्यसीकतिलज्ज॥
एतादृशीमामवलोकयनहरिंगच्छसीतिव्यंग्यं॥३॥ भंगपतिरेणचंद्रंनिंदति॥ सरवि
विभात्यवभातिविभाविभानसरसीसरसासरसारसैः॥अलिकुलैर्विधुताविधुनाधु
तावितन्मदजमुरवीविमुरवीस्थिता॥४॥ सरवीति॥हेसरवीएषासरसीजलाशयेन
विभाति॥स्वल्पजलाभविष्यसीत्यतआह॥कीदृशी॥अविभा॥अप्रभूदंभोगजोयस्याः
सागजपतिवद्भयंसीत्यर्थः॥यमकश्लेषचित्रेषुचबयोरुल्लेखानेभिन्नइतिगंगभट्टः॥ननु
ऊनएतदित्याह॥यतोविधुनाधुना॥धुतभर्त्सितंकंपितइतिविश्वः॥अस्याम्बुद्रेणाभ्रेर
तलंस्वशोभाजनंविघटत्वमेव॥अतएवकीदृशी॥अलिकुलैर्मधुपकुलायैः॥तथासरसा
सरसारसैःसरससलीलंअसरतीतसरसासरसएवविधायेसारसाःतैर्विधुता॥एतत्क
तत्यागबलवद्दुःखसमुदयमुकुलितसरसीरुहत्वहेतुः॥अतएवकीदृशी॥अतिविभा॥
वीभिःपक्षिभिःभाविभाअतिक्रांताविभायस्यासा॥अतएवविभा॥विगतोभायस्यासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतः समुदितदिवाकरसंघट्टनमुकुलितकमलानां वास्यकामैर्भ्रमरादिभिस्त्यक्ता अतएव विन
मदभ्रमुखी अलज्जया अधोमुखदर्शनलक्षणमुखवयस्या सा॥ पुनः कीदृशी। विमुखीभूता॥ चन्द्रा विमुखीभूय वर्तमानेत्यर्थः॥ ६॥ ॥कुमुदिनीदयितोदयितो निताननिजकरैरे
करैर्दहति स्फुट॥ यदयमेकपदे विपदे भवद्दिक्चपुष्करिणीहरिणीदृशः॥ ७॥ कुमु
दिनीदयितइति॥ हे सखी कुमुदिनीदयितश्चन्द्रः दयिता निता विरहिणी निजकरैः स्फुटप्र
करैर्दहति। कीदृशोः करैः अकरैः दुःखदैरित्यर्थः यद्यस्मात्कारणात् अयं चन्द्रः एकपदे
त्सरणमेव दिक्चपुष्करिणीहरिणीदृशः प्रफुल्लायापुष्करिणीकमलिनी सैव हरिणीदृक्
तस्याः विपदे भवतु अतः भगवतीमरीचिमालिनीद्वीपान्तरमितः प्रयायेतस्याः विर
हिणीत्वं उदयतेचन्द्रमसीत्यर्थः॥ ७॥ विधुरिताधुरिता
वनिता दहन् विधुरयं जनितो जनितोऽकृत॥ इह तदक्षिगते क्षिगते क्षिनीरविमति ६
र्विमतिर्निममीलसा॥ ८॥ ॥विधुरिति॥ अयं विधुश्चन्द्रः जनितः जन्मतः अकृत कः
लंकीजनितः उत्पन्नः किं कुर्वन्। ताः विधुरिताः विरहिणीः वनिताः धुरि प्रथमतः दहन् ज

नितस्ताः [illegible]नितवा योजनीयाः॥ तस्मात्कारणात् दहन् चन्द्रः अक्षिगते सति नयनगोचरे सति
साङ्गिनी कमलिनी निममील सुदृशः॥ कीदृग्विमतिः रवौ मतिर्यस्याः सा। अत
एव कीदृशी विमतिः विरुद्धबुद्धिः कीदृशोः अक्षिगते दृष्टिगते दृष्टिपथं गते इति दक्षिण
वर्तः॥ सूर्योपासकेस्पर्धितुद्यते सः पापेनयनगोचरे नयनमीलनं भवत्येवसो क्तिरिति
ध्वनिः॥ ६॥ ॥मलयपन्नगपन्नगभोजीकवलितावलितानुवनानिलः॥ अदयमग
मदगमदगकरहतियङ्गमयन्नमयन्नयं॥ ७॥ ॥मलयेति॥ अंगतिसंबुद्धौ॥ हे सखी वन
नानिलः वनुर्गतिर्वितर्के निश्चितत्वात्॥ मलयपन्नगपन्नगभोजीकवलितः। मलयस्यपा
र्श्वाः प्रत्यंतपर्वताः पादाः प्रत्यंतपर्वताः। तेषुनूनंवृक्षाः तत्संबंधिनोयेयेपन्नगाः सर्पाः भुजं
गाः तेषांभोजीसमूहः तेनकवलितः पीतः कीदृक्। वलितः जायातः। पादाः प्रत्यंतपर्व
ताइत्यमरः। यतः अयं मदगमदगकरभ्रमयन् सन् अदयं निष्करुणं यथास्यात्तथादहति। कीदृ
शोभ्रमयंतीतिभ्रमयं। कीदृशोयं। अगमत्। अगानिवृक्षान्तीत्यगमत्॥ ७॥ ॥अ
यिरसालवनीनवनीरनीरनवनीनवनीपवनीमति॥ अलिकुलालिकुलालिकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लाकुलाप्रतिहिमामहिमामहिमाहिमा॥१०॥ अयीति।अयीत्यामंत्रणे।रसालवनी।अ
म्रवनी।हीतिनिश्चिते।मांप्रतिनीःरंजयतीतिरनीःसंतापिकइत्यर्थः।कीदृशीमां॥विरु
तोन्नाम्यमानां॥नन्विदंमंचोष्णमविष्यतीत्याह।।कीदृशीहिमान्नीतलां॥पुनःकीदृशी
नवनीनवत्वमात्मानंनयतीतिनवनी।पुनःकीदृशीनवनीपवनीमति।नवायेनीपाः
कदंबाःतेषांवनीतद्वतीतिमतुश्।अतएववावनीअवतीत्यवनीतादृशीन।पुनःकीदृशी
अलिकुलाकुलां।अलिकुलैःभ्रमरसमूहैःआकुलां।तथाकलिकुलाकलिकुलां।अ
लीनांकुरुतेतानिआम्रःतत्प्रतिस्पर्धीकुर्वतेतेअलिकुलाःकोकिलाःतेषामालिःपरंपरा॥
मिथ्यालिराचलीपंक्तिरित्यमरः।।तस्याःकुलंसमूहोयस्या।पुनःकीदृशी।अहिमा।अ
हिवत्महिमायस्यासाश्यामेत्यर्थः।।अहिमत्वंचनागवद्भ्यांवहतिभावः॥१०॥ ॥
व्यकुलमाकुलमालिपरागैस्तन्मधुपरागपरागपरालिभिः।।विशदशारदशारदशारदशा
रकेलककेलककलकिंत॥११॥ ॥अलिकुलमिति।हेअलितद्वकुलबकुलपुष्प
क्रीदृक्परागीपरागयुक्।अतएवमधुपरागपरापरालिभिराकुलंमधुचपरागश्चम

CC-0.In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धुपरागोसोपिबतीतेमधुपरागपाःरागोगानेपराःएतादृशाःयेभृंगाःतैराकुलंसंततंपु
नःकीदृक्विशदशारदशारदं।विगतंभंसुरंयस्याःतादृशीद्वंद्वायेषांतेतानरदंतिवि
शारदंशीअसमंतात्तरांतिसाशारातादृशीयादृशातांतांतिशारदशाराःतानदयुति
ततोविशेषणसमासः।विरहजनदुःखदइत्यर्थः॥पुनःकीदृक्॥शशकलंककलंकस्यव
च्चंद्रस्येवकलास्वरूपंयस्यतद्वत्सशोभकमित्यर्थः॥तद्वत्कलंकिंसदृशंदेवंवादोत्समान२
कोब्रह्मनिलेष्वकश्चित्यमरः॥११॥इत्यल्कासरवींद्रनिराधाप्रात॥ ॥नवमशोकम
शोकमशोकदेसुरभितारभितालिरतारलं।सखिसमाश्रयमाश्रयमाश्रयःकमलिनीम
लिनीपइवागतः॥१२॥ ॥नवेति॥हेअशोकदेशोकदातीतादृशीनत्तस्याःसंबुद्धिः॥
यद्वाअस्यविरहेणशोकमात्मनेददातितस्याःसंबुद्धौ।हेअशोकदे।त्वंनवमशोकमशोक
नामानंहर्षजन्यंकीदृशंअशोकंशोकरहितं।नत्वनयार्थपर्यालोचनयामाप्रतारयामीइ
त्यतआह।सुरभितारभितालिरतारतंसुरभितयासौरभ्येनराभितानांरवत्वबल्लिवतभा
जातायेषांकुसुमपरागलोहितागानांअतीवतारतंप्रीतिःतत्प्रसरंकलं॥पुनःकीदृशं॥

माया श्रियः अस्ययंतेनस्ययणेयोग्यत्वमितिभावः॥हेसखीसमाश्रयोहरिरागतस्त्वामनुस्र
तइत्यर्थः॥कःकमिवजलिनीयोग्यमरःकमलिनीपद्मिनीमिव॥१२॥ इत्कारोधापुनः
सखीप्राह॥ ॥सखिहितासिमतासिम तात्यमानवमशोकमशोकमशोकदं॥त
दिहमामवमामवमाममाघ्रजहरिंनव मीरदनीरद॥१३॥सखीति॥ हेसखी
मतात्वमसि॥मतासिरचङ्रूपासि॥ यथारचङ्घातकःतथात्वमपीतिभा॥
वः॥अस्मिमतात्वहितामतासि॥आहोम एकइतिकाकुर्वा॥यात्वमानजशोकं
अथकथयसि॥कीदृशं॥अस्यविश्लेशोशं ।कोस्मानंकिंविधांमाअशोकदंअस्यवि
श्लेशःशोकमात्मनेददातितादृशीतेनरतादृशाःममतादृङ्अशोकाश्रयणकथनरूपा
हितकारिणःस्फुटमसित्वमितिकाकुवाक्ययत्सखीदायापर्यालोचनात्॥ततःअधमा
थानीवितांमात्वमचपाहि॥हरिंब्रज॥कीदृशीमां॥अघमाअघमाचहरंब्रज॥कीदृशं
दृढ कामजहितेप्राप्नोति॥जहितेरालोइः॥यद्वा॥अमीसबुद्धौ।मामचेकीदृशींमांहरिं
ब्रज॥कीदृशंमामवमात्लक्ष्मीमःब्रह्मातेवांतींप्राप्नोतिसःतेनचजलधरश्यामिसर्थः॥

इतिसखीगदितागदितादितानवनरायवरायवरायवा॥इतिगीरंकलयाकलषाकलाप
इगीरामइतामृदुतानुता॥१४॥ ॥इतीति॥कलानामसखीराधयाहरिंब्रजमामवे
तिगदितोक्तः॥कलयागिरागंभीरयावाचाटयरुचयथास्यात्तथाइतिवक्ष्यमाणंगीरचो
चेअनवरायपुराणपुरुषायजहिनाहरिंप्रतिवाचअवोचत इत्यर्थः॥किंविशिष्टायश्रेष्ठ
याय॥तथावरायश्रेष्ठ॥यद्वाउत्कृष्टःजयतिधियसेवरायः।वरायश्चासौवरश्चतस्मैसर्वदा
मंगलरूपायेत्यर्थः॥कीदृशीसखीउत्प्रेक्षते।अगदितेववाइवार्थे॥किंभूतयागिराकल
याकसुरसलातिसाकलातयासुरवक्रागिरेत्यर्थः॥किंविधयागिरा।मृदुतानुता।अमृदुता
कोमलत्वंअमृदुताकठोरत्वं।ताभ्यांउनोतिसाद्रुतीनातुजयेमधर्म्योयलक्षणेविद्रुषक
त्वंयत्क्षरणोतोषकत्वमिति॥१४॥किमुवाचेत्याह॥ ॥मलयजंतनुतेतनुतेतनोस्मर्य
रीनलिनीदलं॥सुनयनानंदनंदचसातरंपिरवीरतिसीदतिबंधुला॥१५
मलयजेति॥हेहरेतवसासतचरीराधातनोशरीरेअतनुबहुमलयजकर्दममतनुते॥क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वारंवारंनिदधातीत्यर्थः॥हेहरेसानलिनीतनोनलिनीदलंपथिनीपत्रंतनुते।इत्यु
दुमुपलक्षणंमृणालशैवलाद्यपिबोध्य॥नलिनीसाम्यंचनत्वात्॥सासुनयनानल
दंजगीरंनलदसम्यममृणालंजलाशयमित्यमरः॥कीदृक्अनलदंमेघापहारमित्य
र्थः॥यद्यप्येवविदधातितदपितथापिसाम्बोदतिबंधुताचबंधुसमहोअस्मदादिःन
नीविति॥९२॥ ॥समुदितसुदितमुदितेक्षणेहिमकरेमकरेनकरेस्मृति॥पिकर
वेवरवेवरवाचसाहरिणलाछनलाछनलाछना॥९६॥ समुदितेति॥हेइंधरल
क्ष्मीनाथहरेअमुदिताउल्लसितासाराधाइक्षणेलोचनेअमुदितेकरे तिष्ठसितिहिम
करेचंद्रेसमुदितेसतिएवचंद्रदर्शनमुक्ताभरणंतच्चविरहातिभरजनकत्वेनकरो
तीतिभावः॥नन्वयमुज्जनकोभविष्यतीत्यतआह॥कीदृशेहिमकरेमकरेनकरो॥मु
कराणायादसांनिधिःमकरेनःसमुद्रःतस्मैकेसुरवंगातिददातिसतस्मिंश्चंद्रादानेतिधा
लुः॥तथाचयःसमुद्रमपिहर्षयतितथाअस्याःमुखप्रदानेकःप्रयासः॥तद्दानेचत्वद्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथतयाकल्याकलयासुभोवनजदामजदामुजदिसिमान्॥हमेरिगात्रमगाद्बृहन्मगाद्बृहन्
सामुदमतीव्रमतीवदृशोःस्थितम्॥१९॥ ॥अथेति॥अथानन्तरंतयाकलयामख्यासहहरिः
शुभांराधांप्रत्यागात्॥कीदृशाकलयाकेसुखेलातीतिकलातयासहहर्षतयेत्यर्थः॥स्त्रीदा
नग्रहणयोः॥कीदृशोहरिः वनजदामजदामजदिक्षिमान्॥वनजानांकमलानांदामपं-
क्तिःतेजसंयद्दाममालातज्जादिक्षिर्यस्मसः॥कमलमालाधानइत्यर्थः॥चयंसाग-
धातंहरिंदृशोःनेत्रयोः उग्रेस्थितमतं अतीवमुदंहर्षंजगात्॥कीदृशंहरिं॥आ
गात्रअगोगोवर्द्धनः अतोयेनसः॥पुनःकीदृशं॥अतीव्रं॥सोम्यदर्शनमित्यर्थः॥
॥१९॥ रामचंद्रकविनाकविनादःप्ररुषोत्तमसुतेनसुतेन॥राधिकाहृदयशो
शोकरमराद्राधिकाहृदयशोकदमीसीत्॥१९॥ ॥अथकविःस्वकीर्त्यनुवा १०
तयेस्वनामग्रंथनामचनिबध्नाति॥रामचंद्रइति॥रामचंद्रकविनाअदःराधिका
हृदयशोकदराधिकायाहृदयशोकःतद्दानद्राधिकाहृदयशोकदनामकाव्य

ते

आसीत्तेनविचरितमित्यर्थः॥कीदृशोनकविना॥कोब्रह्मासःशंभुःअःविष्णुः॥
अःवायुःअःअग्निःतौहृद्यःतेकवास्तेविद्यंयस्यस्वामिनःतथापुरुषोत्तमसुतेन
सुतेनपुरुषोत्तमसुतोजनार्दनोतस्मैइनःतस्यश्रेष्ठःसुतःतेनकिंविदमदःकाव्यं
आरात्दूरंजन्मइतियावत्॥राधिकाहृदयशोकदराधिकाहृदयंयस्यहरः
तस्यशोकःतंदन्तीतद्विकरमित्यर्थः॥इतिराधाविनोदाख्यंकाव्यंसमाप्तं॥७

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीराधाविनोदकाव्यसटीकसमाप्तं ॥

॥१॥

LKSU LIBRARY
RAMTEK
441 106
M-878
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 16:57
,TRANSFERRED=2020/10/22 at 16:58:47
,PAGES=12
,TYPE=STD
,NAME=S0004435
,Book Name=M-878-RADHA VINOD KAVYAM STIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
;

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection